"गृध्रः कङ्कः कपोतश्च उलूकः श्येन एव च । चिल्लश्च चर्म्मचिल्लश्च भासः पाण्डर एव च ॥" क्लिन्ने चक्षुषी अस्य । "क्लिन्नस्य चिल्पिल् लश्चास्य चक्षुषी।" ५ । २ । ३३ । इत्यस्य वार्त्तिं इति चिलादेशो लच्प्रत्ययश्च ।) क्लिन्नचक्षुः । क्लिन्ननेत्रयुक्ते त्रि । इति मेदिनी । ले, १६ ॥

चिल्लका, स्त्री, (चिल्ल इव कायतीति । कै+कः ।) झिल्लिका । इति शब्दरत्नावली ॥

चिल्लभक्ष्या, स्त्री, (चिल्लस्य भक्ष्या भक्षणीया ।) चक्रविलासिनी । इति शब्दचन्द्रिका ॥

चिल्लाभः, पुं, (प्रसह्य हारकत्वात् चिल्ल इव आभातीति । आ+भा+कः ।) प्रसह्यचौरः । इति त्रिकाण्डशेषः ॥ हातहेँ चड़ इति गाँटिकाटा इति च भाषा ॥

चिल्ली, स्त्री, (चिल्लति हावं करोति चिल्ल्यतेऽनेन वा । चिल्ल+इन् । ततो वा ङीष् ।) लोध्रः । पत्रशाकभेदः। तत्पर्य्यायः । चिल्लिका २ क्षुली ३ अग्रलोहिता ४ मृदुपत्री ५ क्षारदला ६ क्षारपत्रा ७ वास्तुकी ८ महद्दला ९ गौड़वास्तुकः १० । (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये । "शतीनो वास्तुकश्चुञ्चू चिल्ली मूलकपोतिकाः । मण्डूकपर्णी जीवन्ती शाकवर्गे प्रशस्यते ॥") अस्य गुणाः । वास्तुकतुल्यत्वम् । क्षारत्वम् । श्लेष्मपित्तप्रमेहमूत्रकृच्छ्रनाशित्वम् । पथ्यत्वम् । रुचिकारित्वञ्च । इति राजनिर्घण्टः ॥ ("तद्वच्चिल्ली तु विज्ञेया वातपित्तविकारिणाम् ॥" इति हारीते प्रथमे स्थाने दशमेऽध्याये ॥) झिल्लिका । इति शब्दरत्नावली ॥

चिविः, पुं, (चीयते आदराय गृह्यते इति । चीव ग्रहणे+"सर्व्वधातुभ्य इन् ।" उणां ४।११७ । इति इन् । पृषोदरादित्वात् ह्रस्वः ।) चिवुकम् । इति जटाधरः ॥

चिविटः, पुं, (चिपिटः निपातनात् पस्य वः ।) चिपिटः । इत्यमरटीका ॥

चिविल्लिका, स्त्री, क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । रक्तदला २ क्षुद्रघोली ३ मधुमालपत्रिका ४ । अस्या गुणाः । कटुत्वम् । कषायत्वम् । जीर्णज्वरे अतिहितत्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥

चिवुः, पुं, (चीयते आदरार्थं गृह्यतेऽसौ । चीव + "मृगय्वादयश्च ।" उणां । १ । ३८ । इति कुप्रत्ययेन साधुः ।) चिवुकम् । इति भरतः ॥

चिवुकं, क्ली, (चिवु+स्वार्थे कन् । अभिधानात् क्लीवत्वम् ।) अधराधोभागः । इत्यमरः । २ । ६ । ९० ॥ थुँति इति दाड़ि इति च भाषा ॥ (यथा, हठयोगप्रदीपिकायाम् । १ । ४६ ।
"उत्तम्भ्य चिवुकं वक्षस्युत्थाप्य पवनं शनैः ॥")

चिवुकः, पुं, (चिवुरिव कायतीति । कै+कः ।) मुचुकुन्दवृक्षः । इति राजनिर्घण्टः ॥

चिह्न, लक्ष्मणि । (अदन्तचुरा-परं-सकं-सेट् ।) सौत्रधातुरयमिति वृद्धाः । इत्यमरटीकायां भरतः ॥

चिह्नं, क्ली, (चिह्न्यतेऽनेनेति । चिह्न लक्ष्मणि+करणे घञ् ।) चिह्न्यते येन तत् । चिना इति दाग् इति च भाषा ॥ तत्पर्य्यायः । कलङ्कः २ अङ्कः ३ लाञ्छनम् ४ लक्ष्म ५ लक्षणम् ६ लिङ्गम् ७ । इत्यमरः । १।३।१७ ॥ लक्ष्मकः ८ । इति भरतः ॥ अभिज्ञानम् ९ । इति जटाधरः ॥ (यथा, भागवते । ४ । १५ । ९ ।
"वैन्यस्य दक्षिणे हस्ते दृष्ट्वा चिह्नं गदाभृतः ।
पादयोररविन्दञ्च तं वै मेने हरेः कलाम् ॥")
पताका । इति मेदिनी । ने, ४ ॥

चिह्नकारी, [न्] त्रि, (चिह्नं करोतीति । कृ+णिनिः ।) घोरदर्शनः । विघाती । इति विश्वः ॥

चिह्नधारिणी, स्त्री, (चिह्नं धरति धारयतीति वा । धृ+णिनिः स्त्रियां ङीप् ।) श्यामालता ! इति शब्दचन्द्रिका ॥

चिह्नितः, त्रि, चिह्न+कर्म्मणि क्तः । चिह्नयुक्तः । अङ्कितः । लक्षितः । (यथा, मनुः । १०।५५ ।
"दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः ॥")

चीक, कि मर्शने। इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट् ।) कि, चीकयति चीकति । मर्शनं स्पर्शः । तथा च । चन्द्रावतीतरङ्गाङ्गाञ्चीकयन्ति च यद्वपुरिति हलायुधः । चायवः स्पृशन्तीत्यर्थः । भट्टमल्लस्तु मर्षण इति मूर्द्धन्यषमध्यं पठित्वा क्षमार्थमाह । इति दुर्गादासः ॥

चीड़ा, स्त्री, गन्धद्रव्यविशेषः । चीड़ागन्ध इति ख्याता । तत्पर्य्यायः । दारुगन्धा २ गन्धवधूः ३ गन्धमादनी ४ लध्वी ५ तारा ६ भूतमारी ७ मङ्गल्या ८ कपटिनी ९ पशुभीतिजित् १० । अस्या गुणाः । कटुत्वम् । कासकफनाशित्वम् । दीपनत्वम् । अत्यन्तसेवनात् पित्तदोषभ्रमापहत्वञ्च । इति राजनिर्घण्टः ॥

चीनं, क्ली, (चिनोति कौशेयादिकमिति । चि+बाहुलकात् नक् दीर्घश्च ।) पताका । इति त्रिकाण्डशेषः ॥ सीसकम् । इति रत्नमाला ॥

चीनः, पुं, (चीयते सञ्चीयते वृषलत्वादिदोषो यत्र । चि+बाहुलकात् नक् दीर्घश्च ।) देशविशेषः । चीना इति भाषा ॥ यथा,—
"काश्मीरन्तु समारभ्य कामरूपात्तु पश्चिमे ।
भोटान्तदेशो देवेशि ! मानसेशाच्च दक्षिणे ।
मानसेशाद्दक्षपूर्व्वे चीनदेशः प्रकीर्त्तितः ॥"
इति शक्तिसङ्गमतन्त्रम् ॥
(तद्देशवासिषु तन्नृपेषु च बहुवचनान्तः । यथा, महाभारते ।२।२६।९ ।
"स किरातैश्च चीनैश्च वृतः प्राग्ज्योतिषोऽभवत् ॥")
अंशुकविशेषः । (यथा, शकुन्तलायां १ माङ्के ।
"चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ॥")
व्रीहिभेदः । तन्तुः । मृगविशेषः । इति मेदिनी । ने, ४ ॥

चीनकः, पुं, (चीन एव । चीन+स्वार्थे कन् ।) धान्यविशेषः । चीना इति भाषा ॥ तत्पर्य्यायः । काककङ्गुः २ । इति हेमचन्द्रः ॥ (यथा, विष्णुपुराणे । १ । ६ । २१ ।
"प्रियङ्गवो ह्युदाराश्च कोरदूषाः सचीनकाः ॥")
अस्य गुणाः । शोषणत्वम् । वायुवर्द्धकत्वम् । पित्तश्लेष्मनाशित्वम् । रूक्षत्वञ्च । इति राजवल्लभः ॥ कङ्गनी । चीनकर्पूरः । इति राजनिर्घण्टः ॥ (चीनदेशवासिषु बहुवचनान्तः । यथा, महाभारते । ८ । ८ । १९ ।
"सुह्मानङ्गांश्च वादांश्च निषधान् पुण्ड्रचीनकान् ॥")

चीनकर्पूरः, पुं, (चीननामकः कर्पूरः ।) कर्पूरविशेषः । चीनकर्पूर इति देशान्तरीयभाषा ॥ तत्पर्य्यायः । चीनकः २ कृत्रिमः ३ धवलः ४ पटुः ५ मेघसारः ६ तुषारः ७ द्वीपकर्पूरजः ८ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । ईषच्छीतत्वम् । कफकण्ठदोषक्रिमिनाशित्वम् । मेध्यत्वम् । पावनत्वञ्च । इति राजनिर्घण्टः ॥

चीनजं, क्ली, (चीने चीनदेशे जायते इति । जन+डः ।) लोहम् । तत्तु तीक्ष्णलौहम् । इति राजनिर्घण्टः ॥

चीनपिष्टं, क्ली, (चीनस्य सीसकस्य पिष्टं क्षतपेषणं वस्तु चूर्णमित्यर्थः ।) सिन्दूरम् । इति हेमचन्द्रः ॥ सीसकम् । इति राजनिर्घण्टः ॥ (यथा, कथासरित्सागरे । २३ । ८५ ।
"चीनपिष्टमयो लोकश्चास्तोकमयी च भूः ॥")

चीनवङ्गं, क्ली, (चीनभवं वङ्गम् ।) सीसकम् । इति राजनिर्घण्टः ॥

चीनाकः, पुं, (चीनं चीनाकारमकतीति । अक+अच् ।) कर्पूरविशेषः । तद्गुणाः । यथा, भावप्रकाशे ।
"चीनाकसंज्ञः कर्पूरः कफक्षयकरः स्मृतः ।
कुष्ठकण्डूवमिहरस्तथा तिक्तरसश्च सः ॥"

चीनाकर्कटी, स्त्री, (चीनमिव स्वादुः कर्कटी । ततः, पृषोदरात् साधुः ।) कर्कटीप्रभेदः । सा तु चित्रकूटदेशे प्रसिद्धा । तत्पर्य्यायः । राजकर्कटी २ सुदीर्घा ३ राजफला ४ बाला ५ कुलककर्कटी ६ । अस्या गुणाः । रुच्यत्वम् । शिशिरत्वम् । पित्तदाहशोषनाशित्वम् । मधुरत्वम् । तृप्तिदत्वम् । हृद्यत्वञ्च । इति राजनिर्घण्टः ॥

चीभ, ऋ ङ कत्थे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) कत्थः प्रशंसा । ऋ, अचिचीभत् । ङ, चीभते गुणिनं गुणी चोऽत्रकारादिरयमित्येके । इति दुर्गादासः ॥

चीय, ऋ ञ संहत्यादानयोः । (भ्वां-उभं-सकं-सेट् ।) चतुर्थस्वरी । ऋ, अचिचीयत् । ञ, चीयति चीयते । इति दुर्गादासः ॥

चीरं, क्ली, (चिनोति व्याप्नोति हृद्यं कटिदेशादिकं वा । चि+"शुसिचिमीनां दीर्घश्च ।" उणां । २ । २५ । इति क्रन् दीर्घश्च ।) वृक्षत्वक् । (यथा, रामायणे । ५ । ३१ । २२ ।
"प्रागेव तु महाबुद्धिः सौमित्रिर्भ्रातृवत्सलः ।
पूर्व्वजस्यानुयात्रार्थं द्रुमचीरैरलङ्कृतः ॥")
जीर्णवस्त्रखण्डम् । इति सुभूतिः । इति लिङ्गादिसंग्रहटीकायां भरतः ॥ (यथा, भागवते ।२।२।५।